Tilak Maharashtra Vidyapith

VAIDIKA SAMS'ODHANA MAṆḌALA

(*Vedic Research Institute*)

POONA

ṚGVEDA-SAṀHITĀ

WITH THE COMMENTARY OF SĀYAṆĀCĀRYA

VOL. IV

Maṇḍalas IX–X

Edited by

N. S. SONTAKKE, B.A. (Tilak)

AND

C. G. KASHIKAR, M.A. (Tilak)

First Edition
1946

Second Edition

1983

Price Rs. 275 1500 -

पमेर्लेड्यडागमः । 'सिब्बहुलम्' इति सिप् ॥ हे vहर्यश्व हरी अश्वौ यस्य तादृश हे vइन्द्र vसः त्वं vनः अस्माकं vप्रजायै । द्वितीयार्थे चतुर्थी । प्रजां पुत्रपौत्रादिकां vमृळय सुखय । vनः अस्मान् vमा vरीरिषः मा हिंसीः । vमा च vपरा vदाः । परादानं परित्यागः । मा परित्याक्षीरित्यर्थः ॥

ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान् ।
वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् ॥ ९ ॥

ये । नः । सऽपत्नाः । अप । ते । भवन्तु । इन्द्राग्निऽभ्याम् । अव । बाधामहे । तान् ।
वसवः । रुद्राः । आदित्याः । उपरिऽस्पृशम् । मा । उग्रम् । चेत्तारम् । अधिऽराजम् । अक्रन् ॥ ९ ॥

vनः अस्माकं vये vसपत्नाः शत्रवः vते vअप vभवन्तु अपगता भवन्तु । स्वस्थानादपगताः प्रच्युता भवन्तु । vतान् सपत्नान् vइन्द्राग्निभ्यां हविर्भिः स्तुत्या च प्रसन्नाभ्यामनुगृहीता वयम् vअव vबाधामहे निकृष्टतरं विनाशयामः । अपि च vवसवो vरुद्रा vआदित्याः च vमा माम् vउपरिस्पृशम् उन्नतपदस्य संस्प्रष्टारं सर्वेभ्यः श्रेष्ठम् vअक्रन् कुर्वन्तु । तथा vउग्रम् उद्गूर्णबलं vचेत्तारं चेतितारम् ॥ छान्दस इडभावः ॥ सर्वस्य ज्ञातारम् vअधिराजं सर्वेषामधीश्वरं च मां कुर्वन्तु ॥ करोतेश्छान्दसे लुङि 'मन्त्रे घस°' इत्यादिना च्लेर्लुक् ॥ ॥ १६ ॥ ॥ १० ॥

एकादशेऽनुवाके त्रयोविंशतिसंख्याकानि सूक्तानि । तत्र 'नासदासीत्' इति सप्तर्चं प्रथमं सूक्तं त्रैष्टुभम् । परमेष्ठी नाम प्रजापतिर्ऋषिः । वियदादिभावानां सृष्टिस्थितिप्रलयादीनामत्र प्रतिपाद्यत्वात् तेषां[1] कर्ता परमात्मा देवता । तथा चानुक्रान्तं—'नासत्सप्त प्रजापतिः परमेष्ठी भाववृत्तं तु' इति । गतो विनियोगः ॥

नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ॥ १ ॥

न । असत् । आसीत् । नो इति । सत् । आसीत् । तदानीम् ।
न । आसीत् । रजः । नो इति । विऽओम । परः । यत् ।
किम् । आ । अवरीवरिति । कुह । कस्य । शर्मन् । अम्भः । किम् । आसीत् । गहनम् । गभीरम् ॥ १ ॥

'तपसस्तन्महिनाजायतैकम्' इत्यादिनाग्रे सृष्टिः प्रतिपादयिष्यते । अधुना ततः प्रागवस्था निरस्तसमस्तप्रपञ्चा या प्रलयावस्था सा निरूप्यते । vतदानीं प्रलयदशायामवस्थितं यदस्य जगतो मूलकारणं तत् vअसत् शशविषाणवन्निरुपाख्यं vन vआसीत् । न हि तादृशात् कारणादस्य सतो जगत उत्पत्तिः संभवति । तथा vनो vसत् नैव सदात्मवत् सत्त्वेन निर्वाच्यम् vआसीत् । यद्यपि सदसदात्मकं प्रत्येकं विलक्षणं भवति तथापि भावाभावयोः सहावस्थानमपि[2] संभवति । कुतस्तयोः तादात्म्यमिति उभयविलक्षणमनिर्वाच्यमेवासीदित्यर्थः । ननु नो सदिति पारमार्थिकसत्त्वस्य निषेधः । तर्ह्यात्मनोऽप्यनिर्वाच्यत्वप्रसङ्गः । अथोच्येत । न[3] । आनीदवातमिति तस्य सत्त्वमग्रे वक्ष्यते परिशेषान्मायाया एवात्र सत्त्वं निषिध्यत इति । एवमपि तदानीमिति विशेषणानर्थक्यं व्यवहारदशायामपि

१. त१.२.३.६.७.८-म-एषां । २. ग-त-म२.५—सद्भावावस्थानमपि । ३. ग-त१.२.३.६.७.८-म-'न' नास्ति ।

तस्याः पारमार्थिकसत्त्वाभावात्[1]। अथ व्यावहारिकसतां पृथिव्यादीनां भावानां[2] विद्यमानत्वात् कथं नो सदिति निषेधः। तत्राह। Vनासीद्रज इत्यादि। 'लोका रजांस्युच्यन्ते' (निरु. ४. १९) इति यास्कः। अत्र च सामान्यापेक्षमेकवचनम्। व्योम्नो वक्ष्यमाणत्वात्तस्याधस्तनाः पातालादयः पृथिव्यन्ता नासन्नित्यर्थः। तथा Vव्योम अन्तरिक्षं तदपि Vनो नैवासीत्। पर इति सकारान्तं परस्तादित्यर्थे वर्तते। परशब्दाच्छान्दसोऽस्तातेरर्थेऽसिप्रत्ययः। Vपरः व्योम्नः परस्तादुपरिदेशे द्युलोकप्रभृतिसत्यलोकान्तं Vयत् अस्ति तदपि नासीदित्यर्थः। अनेन चतुर्दशभुवनगर्भं ब्रह्माण्डं स्वरूपेण निषिद्धं भवति। अथ तदावरकत्वेन[3] पुराणेषु प्रसिद्धानि यानि वियदादिभूतानि तेषामवस्थानप्रदेशं तदावरणनिमित्तं चाक्षेपमुखेन क्रमेण निषेधयति किमावरीवरिति। Vकिम् आवरणीयं तत्त्वमावरकभूतजातम् Vआवरीवः। अत्यन्तमावृणुयात्। आवार्याभावात् तदावरकमपि[4] नासीदित्यर्थः॥ वृणोतेर्यङ्लुगन्ताच्छान्दसे लङि तिपि रूपमेतत्॥ यद्वा। किमिति प्रथमैव। किं तत्त्वमावरकमावृणुयात्। आव्रियमाणवत्तदपि स्वरूपेण नासीदित्यर्थः। आवृण्वत् तत्तत्त्वं Vकुह कुत्र देशेऽवस्थायावृणोति। आधारभूतस्तादृशो देशोऽपि नासीदित्यर्थः॥ किंशब्दात् सप्तम्यर्थे हप्रत्ययः। 'कु तिहोः' (पा. सू. ७.२.१०४) इति प्रकृतेः क्वादेशः॥ Vकस्य Vशर्मन् कस्य वा भोक्तुर्जीवस्य शर्मणि[5] सुखदुःखसाक्षात्कारलक्षणे भोगे निमित्तभूते सति तदावरकं तत्त्वमावृणुयात्। जीवानामुपभोगार्था हि सृष्टिः। तस्यां हि सत्यां ब्रह्माण्डस्य भूतैरावरणं प्रलयदशायां च भोक्तारो जीवा उपाधिविलयात् प्रलीना[6] इति कस्य[7] कश्चिदपि भोक्ता[7] न संभवतीत्यावरणस्य निमित्ताभावादपि तन्न घटत इत्यर्थः। एतेन भोग्यप्रपञ्चवत् भोक्तृप्रपञ्चोऽपि तदानीं नासीदित्युक्तं भवति॥ किंशब्दादुत्तरस्य ङसः 'सावेकाचः०' इति प्राप्तस्योदात्तत्वस्य[8] 'न गोश्वन्साववर्ण०' इति प्रतिषेधः। 'सुपां सुलुक्०' इति शर्मणः सप्तम्या लुक्॥ यद्यपि सावरणस्य ब्रह्माण्डस्य निषेधेन तदन्तर्गतमप्सत्त्वमपि[9] निराकृतं तथापि 'आपो वा इदमग्रे सलिलमासीत्' (तै. सं. ७. १. ५. १) इति श्रुत्या कश्चिदपां सद्भावमाशङ्केत। तं प्रत्याचष्टे अम्भः किमासीत् इति। Vगहनं दुष्प्रवेशं Vगभीरं दुरवस्थानमत्यगाधम् ईदृशम् Vअम्भः Vकिमासीत्। तदपि नैवासीदित्यर्थः। श्रुतिस्त्ववान्तरप्रलयविषया॥

न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास॥ २॥

न। मृत्युः। आसीत्। अमृतम्। न। तर्हि। न। रात्र्याः। अह्नः। आसीत्। प्रऽकेतः।
आनीत्। अवातम्। स्वधया। तत्। एकम्।
तस्मात्। ह। अन्यत्। न। परः। किम्। चन। आस॥ २॥

ननूक्तस्य प्रतिसंहारस्य संहर्त्रपेक्षत्वात् स एव संहर्ता मृत्युर्विद्यत इत्यत आह Vन Vमृत्युरासीत् इति। ननु यदि स नासीत् तर्हि तदभावकृतम् Vअमृतम् अमरणं प्राणिनामवस्थानं तदानीमपि

---

१. त-°सत्त्वाभावात् इति तु न प्रलयदशाया एव वर्णनीयत्वेन तदुपादानौचित्यात् तदानीमपि तत्सत्त्वेन तदबाधात्। २. त१.३-भावानां तदामि; त७-भावानां तदपि। ३. ग-त१.२.३.६.७.८-भ-तदावरणत्वेन; त४.५-तदावरत्वेन। ४. त२.७-भ२.४.८-तद्रक्षकमपि; त३.८-भ५-तत्रक्षकमपि; त६-ततक्षकमपि। ५. त१.३.७-भ२.८-मु-शर्मणि सुखे। ६. ग-त१.२.३.६.७.८-भ-मु-प्रविलीना। ७. ग-कस्यचिदपि भागो; त१.७-भ२.४.७.८-कस्यचिदपि भोगो; त२.३.६.८-कांस्यंचिदपि भोगो। ८. ग-त४.५-भ२ प्राप्तस्योदात्तस्य; त१.२.३.६.७.८-भ-मु-प्राप्तस्य। ९. त१.२.६.७-भ२.८-°मप्तत्वमपि; त४-°मद्दत्वमपि; त५-°माप्राप्तत्वमपि; त८-भ२-°मतत्त्वमपि; भ४.७-°मसत्त्वमपि।

स्यात् तत्राह । vअमृतं vन vतर्हि इति । तर्हि तस्मिन् प्रतिहारसमये । अयं भावः । सर्वेषां प्राणिनां परिपक्वं भोगहेतुभूतं सर्वं कर्म यदोपभुक्तमासीत् तदा भोगाभावान्निष्प्रयोजनमिदं जगदिति परमेश्वरस्य मनसि संजिहीर्षा जायते । तथैव स मृत्युः[1] सर्वं जगत् संहरत[2] इति किमनेन मृत्युना संहर्त्रा तदभावकृतं वा कथममरणं स्यादिति । एतदेवाभिप्रेत्य कठैराम्नायते–‘ यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ’ (क. उ. २. २५) इति । नन्वेतस्य सर्वस्याधिकरणभूतः कालो विद्यत इत्यत आह न राव्या इति । vराव्याः vअह्नः च vप्रकेतः प्रज्ञानं vन vआसीत् । तद्धेतुभूतयोः सूर्याचन्द्रमसोरभावात् । एतेनाहोरात्रनिषेधेन तदात्मको मासर्तुसंवत्सरप्रभृतिकः सर्वः कालः प्रत्याख्यातः । कथं तर्हि नो सदासीत्तदानीमिति कालवाची प्रत्ययः । उपचारादिति ब्रूमः । यथेदानींतननिषेधस्य कालोऽवच्छेदकस्तथा मायापि तदवच्छेदहेतुरित्यवच्छेदकत्वसाम्येनाकालेऽपि कालवाची प्रत्ययः । यदवादिष्म ब्रह्मणः परमार्थसत्त्वमग्रे वक्ष्यत इति तदिदानीं दर्शयत्यानीदिति । vतत् सकलवेदान्तप्रसिद्धं ब्रह्मतत्त्वम् vआनीत् प्राणितवत् । नन्वेवं प्राणनकर्तुर्जीवभावापन्नस्यैव ब्रह्मणः सत्त्वं स्यात् न विवक्षितस्य निरुपाधिकस्य ब्रह्मणः । ‘ अप्राणो ह्यमनाः शुभ्रः ’ इति तस्य प्राणसंबन्धाभावात् तत्राह आनीदवातमिति । अयमाशयः । आनीदित्यत्र धात्वर्थक्रिया तत्कर्ता तस्य च भूतकालसंबन्ध इति त्रयोऽर्थाः प्रतीयन्ते । तत्र समुदायो न विधीयते यथाग्नेयोऽष्टाकपाल इति येन ब्रह्मणः सत्त्वं न स्यात् । किं तर्ह्यनेन कर्तृत्वमनूद्य भूतकालसत्तालक्षणो गुणो विधीयते दध्ना[3] जुहोतीति वाक्यान्तरविहिताग्निहोत्रानुवादेन तत्र गुणविधानम् । तत्राप्यनेन कर्तृत्वविशिष्टस्य न पूर्वकालसत्ता विधीयते[4] तन्निषेधानुपपत्तिप्रसङ्गात् अतोऽनेन कर्तृत्वेन इदानींतनेनोपलक्षितं यन्निरुपाधिकं परं ब्रह्म तस्यैव भूतकालसत्ता विधीयत इति न कश्चिद्दोष इति । नन्वीदृशस्य ब्रह्मणो मायया सह संबन्धासंभवात् सांख्याभिमता स्वतन्त्रा सद्रूपा सत्त्वरजस्तमोगुणात्मिका मूलप्रकृतिरेवाभिमतेति कथं[5] नो सदिति निषेधः । तत्राह vस्वधया इति । स्वस्मिन् धीयते ध्रियत आश्रित्य वर्तत इति स्वधा माया । तया तद्ब्रह्मैकमविभागापन्नमासीत् । ‘ सहयुक्तेऽप्रधाने ’ (पा. सू. २. ३. १९) इति तृतीया सहशब्दयोगाभावेऽपि सहार्थयोगे भवति ‘ वृद्धो यूना° ’ (पा. सू. १. २. ६५) इति निपातनाल्लिङ्गात् । अत्र प्रकृतिप्रत्ययाभ्यां तस्याः स्वातन्त्र्यं निवार्यते । यद्यपि असङ्गस्य ब्रह्मणस्तया सह संबन्धो न संभवति तथापि तस्मिन्नविद्यया तत्स्वरूपमिव संबन्धोऽप्यध्यस्यते यथा शुक्तिकायां रजतस्य । एतेन सद्रूपत्वमपि तस्याः प्रत्याख्यातम् । ननु यदि माया ब्रह्मणा सहाविभागापन्ना तर्हि तस्या अनिर्वाच्यत्वात् ब्रह्मणोऽपि तत्प्रसङ्ग इति कथं तस्य सत्त्वमुक्तम् आनीदवातमिति । ब्रह्मणो वा सत्त्वात्तस्या अपि सत्त्वप्रसङ्ग इति कथं नो सदासीदिति सत्त्वप्रतिषेधः । नैवम् । अयुक्तिदृष्ट्यैक्यावभासेऽपि[6] युक्त्या विविच्य मायांशस्यानिर्वाच्यत्वं ब्रह्मणः सत्त्वं च प्रतिपादितम् । ननु दृग्दृश्याविति द्वावेव पदार्थौ आनीदवातं स्वधयेति तौ चेदङ्गीक्रियेते तत्किमपरमवशिष्यते यत् नासीद्रजः इत्यादिना प्रतिषिध्येत तत्राह तस्मादिति । vतस्माद्ध तस्मात् खलु पूर्वोक्तान्मायासहितात् ब्रह्मणः vअन्यत् vकिं vचन किमपि वस्तु भूतभौतिकात्मकं जगत् vन vआस न बभूव ॥ ‘ छन्दस्युभयथा ’ इति लिटः सार्वधातुकत्वादस्तेर्भूभावाभावः ॥ ननु तदानीमन्यस्य सत्त्वनिषेधो न शक्यः । असत्त्वे चाप्रसक्तत्वान्न[7] निषेधोपयोग इत्यत आह पर इति । vपरः परस्तात् सृष्टेरूर्ध्वं वर्तमानमिदं जगत् तदानीं न बभूवेत्यर्थः । अन्यथा उक्तरीत्या[8] क्वचिदपि निषेधो न स्यादिति भावः ॥

---

१. त१.२.३.४.५.६.८-भ२.८–मृत्युर्त्वं; भ४–मृत्यर्कं; भ७–मृत्युदर्कं । २. १.२.३.६.७.८-भ–संह्रियते; त४.५–संहृत । ३. भ२–यथा दध्ना । ४. त-भ–विधीयते वा । ५. त२.३.६.७.८-भ४.५.७.८–किं । ६. त१७-भ२.५-मु–अनुभवदृष्ट्या ऐक्यावभासेपि; त२.३.६.८-भ८–अनुभवदृष्ट्या ऐक्यावभावेपि; त४.५–अयुक्तिवत् दृष्ट्या ऐक्यावभासेपि; भ७–अनुभवदृष्ट्या ऐक्याभावेपि । ७. त४.५–एव प्रसक्तत्वात् । ८. त-भ–उक्तनीत्या ।

तम॑ आसी॒त्तम॑सा गू॒ळ्हमग्रे॑ऽप्रके॒तं स॑लि॒लं सर्व॑मा इ॒दम्।
तु॒च्छ्येना॒भ्वपि॑हितं॒ यदासी॒त्तप॑स॒स्तन्म॑हि॒नाजा॑य॒तैक॑म्॥ ३ ॥

तम॑ः। आ॒सी॒त्। तम॑सा। गू॒ळ्हम्। अग्रे॑। अ॒प्र॒ऽके॒तम्। स॒लि॒लम्। सर्व॑म्। आ॒ः। इ॒दम्।
तु॒च्छ्येन॑। आ॒भु। अपि॑ऽहितम्। यत्। आसी॑त्।
तप॑सः। तत्। म॒हि॒ना। अ॒जा॒य॒त। एक॑म्॥ ३ ॥

ननूक्तप्रकारेण यदि पूर्वमिदं जगन्नासीत् कथं तर्हि तस्य जन्म। जायमानस्य जनिक्रियायां कर्तृत्वेन कारकत्वात् कारकं च कारणावान्तरविशेष इति कारकस्य सतो नियतपूर्वक्षणवर्तित्वस्य अवश्यंभावात्। अथैतद्दोषपरिजिहीर्षया जनिक्रियायाः प्रागपि तद्विद्यत इत्युच्यते[1]। कथं तस्य जन्म। अत आह तमसा गूळ्हमग्रे इति। vअग्रे सृष्टेः प्राक् प्रलयदशायां भूतभौतिकं सर्वं जगत् vतमसा vगूळ्हम्। यथा नैशं तमः सर्वपदार्थजातमावृणोति तद्वत्। आत्मतत्त्वस्यावरकत्वान्मायापरसंज्ञं भावरूपाज्ञानमत्र तम इत्युच्यते। तेन तमसा निगूळ्हं संवृतं कारणभूतेन तेनाच्छादितं भवति। आच्छादकात् तस्मात्तमसो नामरूपाभ्यां यदाविर्भवनं तदेव तस्य जन्मेत्युच्यते। एतेन कारणावस्थायामसदेव कार्यमुत्पद्यते इत्यसद्वादिनोऽसत्कार्यवादिनो ये मन्यन्ते ते प्रत्याख्याताः। ननु कारणे तमसि तज्जगदात्मकं कार्यं विद्यते चेत् कथं नासीद्रज इत्यादिनिषेधः[2]। तत्राह vतम vआसीत् इति। तमो भावरूपाज्ञानं मूलकारणम्। तद्रूपता तदात्मनाम्। यतः सर्वं जगत् प्राक् तम आसीदतो निषिध्यत इत्यर्थः। नन्वावरकत्वादावरकं तमः कर्तृ आवार्यत्वाज्जगत्कर्म। कथं तयोः कर्मकर्त्रोस्तादात्म्यम्। तत्राह अप्रकेतमिति। vअप्रकेतम् अप्रज्ञायमानम्। अयमर्थः। यद्यपि जगतस्तमसश्च कर्मकर्तृभावो यौक्तिको विद्यते तथापि व्यवहारदशायामिव तस्यां दशायां नामरूपाभ्यां विस्पष्टं न ज्ञायत इति तादात्म्यवर्णनम्॥ अत एव मनुना स्मर्यते—'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः' (मनु. १. ५) इति। कुतो वा न प्रज्ञायते तत्राह। vसलिलम्। 'षल गतौ'। औणादिक इलच्। vइदं दृश्यमानं vसर्वं जगत् सलिलं कारणेन संगतमविभागापन्नम् vआः आसीत्। अस्तेर्लङि तिपि 'बहुलं छन्दसि' इतीडभावे 'हल्ङ्याब्भ्यः' इति तिलोपे 'तिप्यनस्तेः' (पा. सू. ८. २. ७३) इति पर्युदासाद्दकाराभावः। यद्वा सलिलमिति लुप्तोपमम्। सलिलमिव। यथा क्षीरेणाविभागापन्नं नीरं दुर्विज्ञानं तथा तमसाविभागापन्नं जगच्च शक्यविज्ञानमित्यर्थः। ननु विविधविचित्ररूपभूयसः[3] प्रपञ्चस्य कथमतितुच्छेन तमसा क्षीरेण नीरस्येवाभिभवः। तथा तमोऽपि क्षीरवद्बलवदित्येवोच्यते। तर्हि दुर्बलस्य जगतः सर्गसमयेऽपि नोद्भवसंभव इत्यत आह तुच्छ्येन इति। आ समन्ताद्भवतीति vआभु vतुच्छ्येन। छान्दसो यकारोपजनः। तुच्छेन तुच्छकल्पनेन सदसद्विलक्षणेन भावरूपाज्ञानेन vअपिहितं छादितम् vआसीत्। दधातेः कर्मणि निष्ठा। दधातेर्हिः। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। vएकम् एकीभूतं कारणेन तमसाविभागतां प्राप्तमपि तत्कार्यजातं vतपसः स्रष्टव्यपर्यालोचनरूपस्य[4] vमहिना माहात्म्येन vअजायत उत्पन्नम्। तपसः स्रष्टव्यपर्यालोचनरूपत्वं[4] चान्यत्राम्नायते—'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः' (मु. उ. १. १. ९) इति॥

१. त–इत्युच्येत। २. त४.५.भ२–इत्यादिना तन्निषेधः। ३. त-भ२.४.८–विविधविचित्रभूयसः। ४. त१.२.६.७-भ५–यत्पर्यालोचनरूपत्वं परमेश्वरस्य तपः तस्य महिना महिम्ना महत्वेन। छांदसो वर्णलोपः। अजायत तस्मात्तमोरूपात् कारणात् पुनः प्रादुरासीत्। परमेश्वरस्य तपसः स्रष्टव्यपर्यालोचनरूपत्वं; त३.४.५.८-भ२.४.८–यत् पर्यालोचनरूपत्वं।

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा ॥ ४ ॥

कामः । तत् । अग्रे । सम् । अवर्तत । अधि । मनसः । रेतः । प्रथमम् । यत् । आसीत् ।
सतः । बन्धुम् । असति । निः । अविन्दन् । हृदि । प्रतिऽइष्य । कवयः । मनीषा ॥ ४ ॥

ननूक्तरीत्या यदीश्वरस्य पर्यालोचनं जगतः पुनरुत्पत्तौ कारणं तदेव[1] किंनिबन्धनमित्यत आह कामस्तदग्र इति । अग्रे अस्य विकारजातस्य सृष्टेः प्रागवस्थायां परमेश्वरस्य मनसि कामः समवर्तत सम्यगजायत । सिसृक्षा जातेत्यर्थः । ईश्वरस्य सिसृक्षा वा किंहेतुकेत्यत आह मनस इति । मनसः अन्तःकरणस्य संबन्धि वासनाशेषेण मायायां विलीनेऽन्तःकरणे समवेतम् । सामान्यापेक्षमेकवचनम् । सर्वप्राण्यन्तःकरणेषु समवेतमित्यर्थः । एतेनात्मनो गुणाधारत्वं प्रत्याख्यातम् । तादृशं रेतः भाविनः प्रपञ्चस्य बीजभूतं प्रथमम् अतीते कल्पे प्राणिभिः कृतं पुण्यात्मकं[2] कर्म यत् यतः कारणात् सृष्टिसमये आसीत् अभवत् । भूष्णु वर्धिष्ण्वजायत परिपक्वं सत् फलोन्मुखमासीदित्यर्थः । सत्ततो हेतोः फलप्रदस्य सर्वसाक्षिणः कर्माध्यक्षस्य परमेश्वरस्य मनसि सिसृक्षा अजायतेत्यर्थः । तस्यां च जातायां अदृष्टं पर्यालोच्य ततः सर्वं जगत् सृजति । तथा चाम्नायते—'सोऽकामयत बहु स्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वेदं सर्वमसृजत यदिदं किंच' (तै. आ. ८. ६) इति श्रुतिः । आत्मनेत्थमवगमितेऽर्थे विद्वदनुभवमप्यनुग्राहकत्वेन प्रमाणयति सत इति । सतः सत्त्वेन इदानीमनुभूयमानस्य सर्वस्य जगतः बन्धुं बन्धकं हेतुभूतं कल्पान्तरे प्राण्यनुष्ठितं कर्मसमूहं कवयः क्रान्तदर्शना अतीतानागतवर्तमानाभिज्ञा योगिनः हृदि हृदये निरुद्धया मनीषा मनीषया बुद्ध्या । 'सुपां सुलुक्°' इति तृतीयाया लुक् । प्रतीष्य विचार्य । 'अन्येषामपि°' इति सांहितिको दीर्घः । असति सद्विलक्षणेऽव्याकृते कारणे निरविन्दन् निष्कृष्यालभन्त । विविच्याजानन्नित्यर्थः ॥

तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात् ॥ ५ ॥

तिरश्चीनः । विऽततः । रश्मिः । एषाम् । अधः । स्वित् । आसी३त् । उपरि । स्वित् । आसी३त् ।
रेतःऽधाः । आसन् । महिमानः । आसन् । स्वधा । अवस्तात् । प्रऽयतिः । परस्तात् ॥ ५ ॥

एवमविद्याकामकर्माणि सृष्टेर्हेतुत्वेनोक्तानि । अधुना तेषां स्वकार्यजनने शैघ्र्यं प्रतिपाद्यते । येयं नासदासीदित्यविद्या प्रतिपादिता यश्च कामस्तदग्रे इति कामो मनसो रेतः प्रथमं यदासीदिति यत्कर्म एषाम् अविद्याकामकर्मणां वियदादिभूतजातानि सृजतां रश्मिः रश्मिसदृशो यथा सूर्यरश्मिः उदयानन्तरं निमेषमात्रेण युगपत् सर्वं जगत् व्याप्नोति तथा शीघ्रं सर्वत्र व्याप्नुवन् यः कार्यवर्गः विततः विस्तृतः आसीत् । स्विदासीत् इति वक्ष्यमाणमत्रापि संबध्यते । 'विचार्यमाणानाम्' (पा. सू. ८. २. ९७) इति प्लुतः । तत्रोदात्त इत्यनुवृत्तेः स चोदात्तः । स्वित् इति वितर्के । स कार्यवर्गः प्रथमतः किं तिरश्चीनः तिर्यगवस्थितो मध्ये स्थित आसीत् किंवा अधः अधस्तात् आसीत् । आहोस्वित् उपरि उपरिष्टात् किमासीत् । 'उपरि स्विदासीदिति च' (पा. सू. ८.२. १०२) इत्यनुदात्तः प्लुतः । 'आत्मन आकाशः संभूत आकाशाद्वायुर्वायोरग्निः' (तै. आ. ८. १) इत्यादिकया पञ्चमीश्रुत्या तत उद्गातारं ततो होतारमितिवत् क्रमप्रतिपत्तौ सत्यामपि विद्युत्प्रकाशवत्

---

१. त-भ-तदेव वा । २. भर-पुण्यापुण्यात्मकं ।

सर्गस्य शीघ्रव्यापनेन[1] तस्य क्रमस्य दुर्लक्षणत्वादेतेषु त्रिषु स्थानेषु प्राथम्यं कुत्रेति विचार्यते। एवं नाम शीघ्रं सर्वतो दिक्षु सर्गो निष्पन्न इत्यर्थः। एतदेव विभजते। सृष्टेषु कार्येषु मध्ये केचिद्भावाः vरेतोधाः रेतसो बीजभूतस्य कर्मणो विधातारः कर्तारो भोक्तारश्च जीवाः vआसन् अन्ये भावाः vमहिमानः। स्वार्थिक इमनिच्। महान्तो वियदादयो भोग्याः vआसन्। एवं मायासहितः परमेश्वरः सर्वं जगत् सृष्ट्वा स्वयं चानुप्रविश्य भोक्तृभोग्यादिरूपेण विभागं कृतवानित्यर्थः। अयमेवार्थस्तैत्तिरीयके 'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै. आ. ८. ६) इत्यारभ्य प्रतिपाद्यते। तत्र च भोक्तृभोग्ययोर्मध्ये vस्वधा। अन्ननामैतत्। भोग्यप्रपञ्चः vअवस्तात् अवरो निकृष्ट आसीत्। vप्रयतिः प्रयतिता भोक्ता vपरस्तात् पर उत्कृष्ट आसीत्। भोग्यप्रपञ्चं भोक्तृप्रपञ्चस्य शेषभूतं कृतवानित्यर्थः। 'विभाषा परावराभ्याम्' (पा. सू. ५. ३. २९) इति प्रथमार्थे अस्तातिः। 'अस्ताति च' (पा. सू. ५. ३. ४०) इत्यवरशब्दस्यावादेशः। अवस्तादिति संहितायाम् ईषाअक्षादित्वात् प्रकृतिभावः॥

को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः।
अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव॥ ६॥

कः। अद्धा। वेद। कः। इह। प्र। वोचत्। कुतः। आऽजाता। कुतः। इयम्। विऽसृष्टिः।
अर्वाक्। देवाः। अस्य। विऽसर्जनेन। अथ। कः। वेद। यतः। आऽबभूव॥ ६॥

एवं भोक्तृभोग्यरूपेण सृष्टिः संग्रहेण प्रतिपादिता। 'एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नाद'(श. ब्रा. १ .४.२ १३) इतिवत्। अथेदानीं सा सृष्टिर्दुर्विज्ञानेति न विस्तरेणाभिहितेत्याह को अद्धेति। vकः पुरुषः vअद्धा पारमार्थ्येन vवेद जानाति। vकः वा vइह अस्मिँल्लोके vप्र vवोचत् प्रब्रूयात्। vइयं दृश्यमाना vविसृष्टिः विविधा भूतभौतिकभोक्तृभोग्यादिरूपेण बहुप्रकारा सृष्टिः vकुतः कस्मादुपादानकारणात्। vकुतः कस्माच्च निमित्तकारणात् vआजाता समन्ताज्जाता प्रादुर्भूता। एतदुभयं सम्यक् को वेद को वा विस्तरेण वक्तुं शक्नुयादित्यर्थः। ननु देवाः अजानन्तः। सर्वज्ञास्ते ज्ञास्यन्ति वक्तुं च शक्नुवन्तीत्यत[2] आह अर्वागिति। vदेवाः च vअस्य जगतो विसर्जनेन vवियदादिभूतोत्पत्त्यनन्तरं विविधं यद्भौतिकं सर्जनं सृष्टिस्तेन vअर्वाक् अर्वाचीनाः कृताः। भूतसृष्टेः पश्चाज्जाता इत्यर्थः। तथाविधास्ते कथं स्वोत्पत्तेः पूर्वकालीनां सृष्टिं जानीयुः। अजानन्तो वा कथं प्रब्रूयुः। उक्तं दुर्विज्ञानत्वं[3] निगमयति। vअथ एवं सति देवा अपि न जानन्ति किल[4]। तद्व्यतिरिक्तः vकः नाम मनुष्यादिः vवेद तज्जगत्कारणं जानाति vयतः कारणात् कृत्स्नं जगत् vआबभूव अजायत[5]॥

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।
यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद॥ ७॥

इयम्। विऽसृष्टिः। यतः। आऽबभूव। यदि। वा। दधे। यदि। वा। न।
यः। अस्य। अधिऽअक्षः। परमे। विऽओमन्। सः। अङ्ग। वेद। यदि। वा। न। वेद॥७॥

उक्तप्रकारेण यथेदं जगत्सर्जनं दुर्विज्ञानं एवं सृष्टं तज्जगत् दुर्धरमपीत्याह इयमिति। vयतः[6] उपादानभूतात् परमात्मनः vइयं vविसृष्टिः विविधा गिरिनदीसमुद्रादिरूपेण विचित्रा सृष्टिः

---

१. त४.५-भ७-शीघ्रव्यापने। २. ग-भ-शक्ष्यंतीत्यत। ३. ग-त१.२.३.६.७.८भ-दुर्ज्ञानत्वं।
४. त१.२.३.६.७.८-भ-'किल' नास्ति। ५. ग-त२.३.६.७.८-आजायत। ६. त-भ-'यतः' नास्ति।

आबभूव आजाता सोऽपि किल यदि वा दधे धारयति यदि वा न धारयति। एवं च को नाम अन्यो धर्तुं शक्नुयात्। यदि धारयेदीश्वर एव धारयेन्नान्य इत्यर्थः। एतेन कार्यस्य धारयितृत्वप्रतिपादनेन ब्रह्मण उपादानकारणत्वमुक्तं भवति। तथा च पारमार्षं सूत्रं—'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (वे. सू. १. ४.२३) इति। यद्वा। अनेनार्धर्चेन पूर्वोक्तं सृष्टेर्दुर्ज्ञानत्वमेव द्रढयति। को वेदेत्यनुवर्तते। इयं विविधा सृष्टिः यत[1] आबभूव आ समन्तादजायतेति को वेद। न कोऽपि। नास्त्येव जगतो[2] जन्म न कदाचिदनीदृशं जगदिति बहवो भ्रान्ता भवन्त्यपि। यतः। 'जनिकर्तुः प्रकृतिः' (पा. सू. १.४.३०) इत्यपादानसंज्ञायां पञ्चम्यास्तसिल्। यस्मात् परमात्मन उपादानभूतादाबभूव[3] तं परमात्मानं को वेद। न कोऽपि। प्रकृतितः परमाणुभ्यो वा जगज्जन्मेति हि बहवो भ्रान्ताः। तथा स एवोपादानभूतः परमात्मा स्वयमेव निमित्तभूतोऽपि सन् यदि वा दधे विदधे इदं जगत् ससर्ज यदि वा न ससर्ज। असंदिग्धे संदिग्धवचनमेतच्छास्त्राणि चेत्प्रमाणं स्युरिति यथा। स एव विदधे। तं को वेद। अजानन्तोऽपि बहवो जडात् प्रधानादकर्तृकमेवेदं जगत् स्वयमजायतेति विपरीतं प्रतिपन्ना विदधतो[4] विधानमजानन्तोऽपि[4]। स एव उपादानभूत इत्यपि को वेद। न कोऽपि। उपादानादन्यः तटस्थ एवेश्वरो विदधे इति हि बहवः प्रतिपन्नाः। देवा अपि यन्न जानन्ति तदर्वाचीनानामेषां तत्परिज्ञाने कैव कथेत्यर्थः। यद्येवं जगत्सृष्टिरत्यन्तदुरवबोधा न तर्हि सा प्रमाणपद्धतिमध्यास्त इत्याशङ्क्य तत्सद्भाव ईश्वरमेव प्रमाणयति यो अस्येति। अस्य भूतभौतिकात्मकस्य जगतः यः अध्यक्षः ईश्वरः परमे उत्कृष्टे सत्यभूते व्योमन् व्योमन्याकाशे आकाशवन्निर्मले स्वप्रकाशे। यद्वा॥ अवतेस्तर्पणार्थात् 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन्। 'नेड्वशि कृति' इतीट्प्रतिषेधः। 'ज्वरत्वर०' इत्यादिना वकारोपधयोः ऊठ्। सप्तम्या लुक्। 'न ङिसंबुद्ध्योः' इति नलोपप्रतिषेधः॥ व्योमनि विशेषेण तृप्ते[5]। निरतिशयानन्दस्वरूपे इत्यर्थः। यद्वा। अवतिर्गत्यर्थः। व्योमनि विशेषेण गते व्याप्ते। देशकालवस्तुभिरपरिच्छिन्न इत्यर्थः। अथवा। अवतिर्ज्ञानार्थः। व्योमनि विशेषेण ज्ञातरि विशिष्टज्ञानात्मनि। ईदृशे स्वात्मनि प्रतिष्ठितः। श्रूयते हि सनत्कुमारनारदयोः संवादे—'स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि' (छा. उ. ७.२४.१) इति। ईदृशो यः परमेश्वरः सो अङ्ग। अङ्गेति प्रसिद्धौ। सोऽपि नाम वेद जानाति। यदि वा न वेद न जानाति। को नाम अन्यो जानीयात्। सर्वज्ञ ईश्वर एव तां सृष्टिं जानीयात् नान्य इत्यर्थः॥ ॥ १७ ॥

'यो यज्ञः' इति सप्तर्चं द्वितीयं सूक्तं प्रजापतिपुत्रस्य यज्ञाख्यस्यार्षम्। आद्या जगती शिष्टास्त्रिष्टुभः। अत्रापि यज्ञादीनां केषांचिद्भावानां सृष्टिः प्रतिपाद्यते। अतः स्रष्टव्यत्वेन प्रधानभूतो योऽर्थः सैव देवता। तत्कर्ता[6] प्रजापतिरेव देवता। तथा चानुक्रान्तं—'यो यज्ञो यज्ञः प्राजापत्यो जगत्याद्या' इति। गतो विनियोगः॥

यो यज्ञो विश्वतस्तन्तुभिस्तत एकशतं देवकर्मेभिरायतः।
इमे वयन्ति पितरो य आययुः प्र वयाप वयेत्यासते तते॥ १॥

यः। यज्ञः। विश्वतः। तन्तुऽभिः। ततः। एकऽशतम्। देवऽकर्मेभिः। आऽयतः।
इमे। वयन्ति। पितरः। ये। आऽययुः। प्र। वय। अप। वय। इति। आसते। तते॥ १॥

---

१. ग-त-भ-'यतः' नास्ति। २. त-भ-'जगतो' नास्ति। ३. त-भ-उपादानाद्बभूव। ४. त१.२.३.६.७.८-भ२.४.८-विदधानोपि विदधानं तं जानतोपि; त४.५-विदधतोपि दधानं जानंतोपि; भ७-विदधेतं जातं जानंतोपि। ५. ग-भ२.४.८-तृप्ते नित्यतृप्ते। ६. ग-त१.२.३.६.८-भ२.४.८-तद्वत् कर्ता।